1354

M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 839

Title: Tarka Tatva

तर्कतत्व

Tarka Tatwa	Title
Nātha	Author
	Editor
	Year, Vols.
	Publisher
	Remarks
839	

839

तर्क १

ॐ नमस्तस्मै कथं तर्कमनिष्कृष्य तार्किकास्त्वामुपासतां अतो नाथेन हे नाथ तर्कत्वं निरूप्यते अथ योसावश्रूमलापहरैश्चारानि
खिलपुरुषार्थानां असाधारणं साधनं अखिलप्रमाणसहकृत्वा प्रसंजनं आपत्तिरूहस्तर्क इत्यादिपदैर्व्यपदिश्यते व्याप्यमित्यारोपणात्पाद
कमित्यादिपदव्यपदेश्यस्य वस्तुन आरोपेण चोत्साद्यते धर्मिणि निर्णीतव्यतिरेकस्य आपाद्यस्य व्यापकपदार्थस्यारोपस्तत्र तर्कत्वं नाम
मानसत्वव्याप्यं आपाद्यामीत्यनुभवसाक्षिकं सामान्यं अथ तर्कमानसत्वे किं मानं मानसत्वव्यापकप्रत्यक्षत्वस्य असिध्या व्याप्यस्य सुतरा
मसिद्धेः प्रायेण तर्काणां अप्रमात्वात् प्रमात्वेपि स्मृतिकरणेष्विव तत्करणेष्वपि प्रामाणिकानां प्रमाणव्यवहारसंभवेन अनुवृत्तिव्याप्यानां
चतसृणां जातीनां एकतरस्याः कृत्स्ने विनिगमनाविरहेण सर्वासामेव तत्कावृत्तित्वात् न केवलं साधकविरहः यावद्बाधकमप्यु
दाहरंति प्रकृतपरिपंथिनः तथाहि तर्काणां मानसत्वे जलं जलं व्यापकीभूताभावप्रतियोगिपृथिवीत्ववत्स्यात् जले जलभेदसत्वादि
त्याकारकप्रसंगे पूर्वमसत्ताभावघटिता या एव व्यापकीता तायाः परामृष्टत्वादज्ञातभेदस्य कथं विषयत्वसंभवः भेदत्वस्याज्ञाने सामान्यप्र
त्यासत्तेरप्ययोगात् अप्रत्यासन्नस्य चेंद्रियैरग्रहणात् ऊहः स्वपक्षीविधाबुद्धिरितिवादिनां तु विशेषणज्ञानोपनयादजन्य
प्रत्यक्षं प्रत्येव जनकतया पूर्वानुपस्थितभेदस्य प्रकारतयावगाहनेन न किंचिद्बाधकं विशेषणतावच्छेदकप्रकारकनिर्णयस्य वि
शिष्टवैशिष्ट्यबुद्धिमात्रं प्रति हेतुत्वेपि जलभेदत्वभेदत्वप्रकारकबुद्धिविरहेपि जलवृत्तित्वजलप्रतियोगिकत्वभेदत्वानां ए
कत्रत्रयमितिरीत्या प्रकृततर्के भावगाहनात् एतेन विधेयताविशेषो वह्निमनुमिनोमि तु पर्वतत्वं इत्यनुभवसाक्षिको वश्यं
नै

अंगीकरणीयः स एव आपाद्यत्वं नाम अतिरिक्तविषयतायां मानाभावात् एवं च भेदत्वादेरन्यकालेपि व्यतिरेकितर्केण वशाज्जलभेदत्वावच्छिन्नवि
धेयतानिरूपित जलत्वावच्छिन्नोद्देश्यताकप्रसंगो मानसरूपोपि ज्ञायमानो विधेयतयैव इतरभेदं अवगाहते न तु प्रकारतया विशेष्यतया वा
यैभेदत्वप्रकारिको ज्ञानप्रत्यासत्तिं सामान्यप्रत्यासत्तिं चापेक्षेत विधेयतायां तु न प्रकारतावद्विशेष्यतात्वस्वीकारे गौरवात् द्वितीये न पक्षवि
शेष्यकत्वस्वीकारस्तु प्रकारतयेतरभेदमवगाहमानेन भेदत्वप्रकारकं स्मरणादिकार्यं जन्यते प्रथमतर्कात्मकविशेषणज्ञानवशाद्द्वितीय
तर्कस्य तत्प्रकारतायां बाधकाभावादिति परास्त अप्रत्यासन्नस्य इंद्रियैरग्रहणात् यद्यपि कविकाव्यादिमूलीभूतवाक्यार्थमान
सबोधेन पूर्वानुपस्थितसंसर्गस्यापि ग्रहणात् प्रत्यक्षविषयतासामान्यं न संनिकर्षनियम्यं किंतु प्रकारताविशेष्यतयोरेवेत्यनुपस्थि
तभेदादेरपि केवलविधेयतया भाने बाधकाभावः तथापि भेदत्वावच्छिन्नप्रकारताकबुद्धौ भेदत्वप्रकारकबुद्धेः कारणत्वात्प्रथमतर्के
ण भेदत्वस्य प्रकारतयानवगाहनात् द्वितीयतर्कोपि न तदवच्छिन्नप्रकारताक इति स्मरणादिकार्यानुपपत्तितादवस्थ्यं न च मा
स्तु भेदत्वावच्छिन्नप्रकारताको द्वितीयस्तर्कः जले भेदं तत्र च भेदत्वं विशेष्ये विशेषणन्यायेनैवावगाहत इति वाच्यं भेदादेर्निरव
च्छिन्नप्रकारतास्वीकारे सिद्धान्तविरोधात् अतएव व्यतिरेकितर्केण परामर्शो वादिजन्यानुमितिप्रसंगादीनां साध्यविशेष्यविशे
ष्यकत्वमंगीकुर्वंति अन्यथा पूर्वानुपस्थितस्य यथा कथंचिदुपस्थितस्य वा भेदत्वादेरिव भेदादेरपि प्रकारतया भाने बाधकाभावा
द्विशेष्ये विशेषणमिति न्यायेनैव तदुभयमंगीकर्तुमुचितं स्यात् किंच सखंडपदार्थस्य निरवच्छिन्नप्रकारतास्वीकारे घटघटत्वा

त०तर्क र्यनिर्विकल्पानंतरं नियमतउभयप्रकारकसविकल्पकापत्तिरुभयत्रविशेषणज्ञानस्यसंपन्नत्वात् ममतु घटप्रकारतायाः द्रव्यत्वघटत्वाद्यव
च्छिन्नायाः एवपारमार्थिकतया तन्नियामकद्रव्यत्वादिप्रकारकज्ञानविरहात् नप्रथममेवघटप्रकारकप्रसंगः द्वितीयसविकल्पकस्यतु घटे
२ घटत्वं इत्येवमाकारः सर्वसंमतएव अथप्रकारतासंसर्गतावच्छेदकतादिसाधारणविशेषणतात्वंनामपदार्थोवश्यं अंगीकरणीयः यदेवंत्व
तु तदभाववत्तितद्विशेषणकत्वरूपाप्रामाण्यघटके प्रकारतात्वस्यतद्घटकत्वे गोत्वीयसंयोगेनभूतलेघटवत् इतिबुद्धेरप्रामाण्या
नुपपत्तिः संयोगसंबंधावच्छिन्नप्रतियोगिताकघटाभावस्यभूतलाद्वृत्तित्वात् गोत्वीयसंयोगसंबंधावच्छिन्नप्रतियोगितायाः प्रका
रीभूयावच्छेदकतायाः व्यधिकरणधर्मावच्छिन्नत्ववादिभिरप्यनभ्युपगमात् तस्मात् गोत्वीयत्वाभाववति गोत्वीयत्वविशेषणकत्वमेवत
त्राप्रामाण्यंतदेवनामविशेषणकत्वंप्रतिबध्यतावच्छेदकं बाधबुद्धेः संयोगोनगोत्वीय इति प्रत्ययादनंतरं गोत्वीयसंयोगसंसर्गकबुद्धेरप्य
नुत्पादात् विशेषणतावच्छेदकविशेषणकत्वमेवतदवच्छिन्नप्रकारताकबुद्धिजनकतावच्छेदकं इतरथासंयोगसंसर्गकबुद्धेरनंतरं तत्प्रकारकप्र
तीत्यनुपपत्तिः विशेषणतात्वंतु विधेयतावच्छेदकतादिसाधारणमेवांगीकर्तव्यं अतएवभेदत्वादिना घटंविदधति अनुमितिरप्रमापर्वभेदत्व
बुद्धेरभावात् तत्प्रकारताघटिताप्रामाण्यस्यासंभावितत्वात् तस्माद्द्वितीयतर्कस्यभेदप्रकारताकत्वेनकिमपिबाधकं इतिचेत् एवंहि २
संयोगसंसर्गकबुद्धेरनंतरंसंयोगोनास्तीतिप्रतीत्यापत्तिः नखलुविशेषणतावच्छेदकप्रकारकनिर्णयकारणतात्पृथक्प्रतियोगिज्ञानका
रणत्वं अनुमन्यते संयोगत्वावच्छिन्नसंसर्गकबुद्धेरनंतरंतु प्रथमंसंयोग इति तदनंतरं संयोगवान् इतिबुद्धिरभ्युपेयते अथममापि
द्वितीयस्तर्कोनभवति भेदवज्जलं इत्याकारः किंतु भेदे जलवृत्तित्व जलप्रतियोगिकत्वभेदत्वानि एकत्रत्रयमितिरीत्या अवगाहमा

नो जलेजलभेद इत्याकारएवस्यात् तत्रचप्रथमतर्केरूपविशेषणज्ञानगोचरीकृतस्यभेदत्वस्य अखंडधर्मस्य निरवच्छिन्नप्रकारतायां नकिमपि
बाधकमितिचेत् मैवं जलभेदत्वप्रकारतायां जलभेदत्वावच्छिन्नविधेयताव्यापकतया भेदत्वादिज्ञानशून्यकालीनाया आपत्तेरनुमितेर्वा तद्धर्मा
वच्छिन्नविधेयत्वासंभवात् इतरथा पृथिवीजलं इत्याकारकबाधबुद्धिकाले जलव्यापकीभूताभावप्रतियोगिपृथिवीत्ववती पृथिवी इत्येवमाकारकपरा
मर्शात् प्रतिबध्यतावच्छेदकीभूतजलभेदत्वप्रकारतानिरूपितपृथिवीत्वावच्छिन्नविषयताकबुद्धित्वरहितायाः जलभेदत्वादिज्ञानशून्यकालेप्रसिद्धु
सिद्ध्या अनुमितेः आपत्तिपरिहाराय जलभेदत्वावच्छिन्नविधेयतानिरूपितपृथिवीत्वावच्छिन्नोद्देश्यताकबुद्धिप्रति कथितबाधबुद्धेः पृथक्प्रति
बंधकतास्यात् यद्विचप्रकारतास्थानेविशेषणत्वमेवप्रवेश्यपूर्वोक्तरीत्या तद्धर्मावच्छिन्नविधेयतामात्रशाल्यनुमितिसाधारणबाधबुद्धिप्रतिब
ध्यतावच्छेदकं निरुच्यते अथवा अनुमितिविधेयतावच्छेदकतातत्प्रकारताप्यत्वेपि आपत्तौ तथानियम अप्रामाणिकः तत्रबाधबुद्धेरप्रतिबंध
कत्वात् वस्तुतस्तु सर्वत्रैवतर्के विधेयतावच्छेदकप्रकारतानिरूपितविशेष्यत्वाभिन्नविधेयविषयता नांगीक्रियते अतएवात्रबाधो
नुकूलः किंतु तद्धर्मावच्छिन्नविधेयतैव केवलमंगीक्रियत इत्युच्यते तर्हि विधेयापरागेण तर्कानुव्यवसायापत्तिः जले जलभेदमापादयामि
इत्येवमाकारकानुव्यवसायेहि जलभेदोविशेषणतयाभासमानो जलभेदत्वप्रकारिकां बुद्धिं पूर्वंअवश्यमपेक्षते संयोगसंसर्गकबुद्धेरनंतरं संयो
गज्ञानाभीत्यनुव्यवसायानुदयात् अथजलभेदत्वेनभेदज्ञानशून्यकालीनाव्यतिरेकव्यनुमितिरापत्तिर्वा प्रत्यक्षबहिर्भावेप्यनुपपन्नैव भेदत्वा
वच्छेदेनजलवृत्तित्वावगाहित्वेपूर्वंविशेष्यतावच्छेदकप्रकारकनिर्णयाभावादिकत्र इत्यंन्यायेनतदसंभवात् यदवगाहित्वेपिभेदत्वरूपवि
शेषणज्ञानाभावात् तत्प्रकारतानुपपत्तिः नचविशेषणज्ञानकारणत्वेमानाभावः अजातिमान्घट इत्यादौ जातित्वावच्छिन्न

त॰ वच्छिन्नप्रकारताद्वयनियमनीय जातित्वावच्छिन्नप्रकारताकबुद्धिं जातित्वावच्छिन्नसंसर्गतातिरिक्तविषयताकबुद्धिं प्रतिवा जातित्वप्र
कारकबुद्धेः अनवच्छिन्नप्रकारताकबुद्धौ प्रकारत्वानिरूपकविषयताकबुद्धेः कारणत्वेपि तत्कार्यतावच्छेदककोटौ जन्यप्रत्यक्षत्वजातेरेवनि
३ वेशेन ननुगुरुतरविनिगमनाविरहग्रस्तजन्यत्वघटितस्य ज्ञानत्वस्यैति अतः परामर्शादिकार्यतावच्छेदकजलभेदत्वावच्छिन्नविधेयताकानु
मितित्वावच्छिन्नमुख्यमानं व्यापकीभूतासंसर्गाग्रहकार्यतावच्छेदकीभूतभेदत्वप्रकारकत्वघटितधर्मावच्छिन्नं भवच्छेदत्वज्ञानं नापेक्षते नवा
भेदत्वप्रकारकंज्ञानं भेदोनेत्येवमाकारकाभावविशेषणकबुद्धौ भेदत्वनिर्विकल्पकानंतरं आपत्तिवारणाय भेदत्वप्रकारकबुद्धौ भेदत्वावच्छिन्नवि
शेष्यताक तदवच्छिन्नविषयताकं वाज्ञानं प्रतिकारणतायाः प्रामाणिकत्वेपि तत्कार्यतायाः जन्यप्रत्यक्षत्वजातेरवच्छेदादितिवाच्यं एवंहितुल्ययु
क्त्या विशेषणतावच्छेदकप्रकारकनिर्णयस्यापि अनुमित्यनपेक्षणात् जलभेदत्वविशिष्टप्रकारप्रकारकव्यतिरेक्यनुमितिः कुतोनाभ्यु
पेयते कृतं साध्यविशेष्यतास्वीकारेण यदिचभेदोजलीयोनवा इत्याकारकसंदेहकालीनाया व्यतिरेकिण्या जलभेदानुमित्या विशिष्टवै
शिष्ट्यबुद्धिजननीयप्रवृत्त्यादिकार्याज्जननात् जलभेदत्वविशिष्टवैशिष्ट्यानुमितिं प्रत्यपि भेदोजलीय इति निर्णयस्य कारणत्वमंगी २
क्रियते तदाविशेष्यविशेषणमितिन्यायेनैवप्रकृतानुमितिरंगीक्रियतां ननुसाध्यविशेष्यिका तस्याः साध्यविशेष्यकसिद्धेः साध्यता
वच्छेदकप्रकारकज्ञानस्यवा पृथक्प्रतिबंधकतापत्तेः अन्यथा जलभेद इत्याकारकसिद्धावपि तादृशानुमित्यापत्तिः साध्यप्रकारकानुमिति
प्रतिबंधकतावच्छेदकीभूतसिद्धित्वस्य साध्यप्रकारताघटितत्वेन साध्यविशेष्यकसिद्धिसाधारण्याभावात् दुर्वचश्च जलभेदविशेष्यक
सिद्धेर्जलभेदत्वप्रकारकज्ञानस्यवा प्रतिबध्यतावच्छेदकं जलभेदमुख्यविशेष्यकानुमितित्वस्य तथाहि आधेयतया पृथिव्याव्याप्य

यत्तद्वा जलभेद इतिपरामर्शादपि अनुमितेरजननापत्तेः जलभेदत्वावच्छिन्नविधेयतामुख्यविशेष्यतोभयसंबंधेन अमुकपुरुषीयानुमितिं प्रति
जलभेदत्वप्रकारतानिरूपितविशेष्यतया स्वप्रकारीभूतजलभेदत्वाश्रयत्वेन तदन्यतरेणवासंसर्गेण तत्पुरुषीयज्ञानस्य समवायेन जलभेद
त्वावच्छिन्नविधेयतामुख्यविशेष्यतोभयशाल्यनुमितिं प्रति समवायेनजलभेदत्वप्रकारकज्ञानस्यवा प्रतिबंधकत्वस्वीकारेतु जलभेदव्या
प्यवतीपृथिवी प्रमेयत्वव्याप्यवान् जलभेद इत्येवमाकारकसमूहालंबनपरामर्शात् पृथिवी जलभेदवती। लं+ जलभेदः प्रमेय इति
समूहालंबनानुमितिरपिनस्यात् नचेयं अनुमितिः जलभेदत्वावच्छिन्नमुख्यविशेष्यिका किंतु पृथिव्यां जलभेदं तत्रचप्रमेयत्वं अव
गाहमाना प्रमेयजलभेदवती पृथिवी इत्येवमाकारैवास्त्विति वाच्यं अन्वयिपरामर्शस्य पक्षमुख्यविशेष्यकानुमितिं प्रत्येवजनक
त्वात् अन्यथा महानसीयत्वव्याप्यवान् वह्निः वह्निव्याप्यवान् पर्वतः प्रतियोगितया वह्निव्याप्यवानभावः अभावव्याप्यवान् पर्वतः
इतिसमूहालंबनपरामर्शात् पर्वतोमहानसीयवह्निमान् महानसीयवह्न्यभाववान् इति संदेहात्मिकानुमितिजननापत्तेः महानसीयव
ह्न्यभावबुद्धिं प्रत्येव महानसीयोवह्निः इति बुद्धेः कारणत्वेपि तस्याः पूर्वसंभवात् नचतस्याः सिद्धिभूतायाः पूर्वसत्त्वे वह्नित्वावच्छिन्नो
द्देश्यताकमहानसीयत्वविधेयताकानुमितेः कथं उत्पादापादनं इतिवाच्यं वह्नित्वसामानाधिकरण्येनसिद्धावपि वह्नित्वावच्छेदेनमहा
नसीयत्वव्याप्यपरामर्शात् वह्नित्वावच्छेदेनमहानसीयत्वानुमितिजनने बाधकाभावात् ननुवह्नित्वावच्छिन्नसंसर्गेण महानसीयत्ववि
शिष्टवैशिष्ट्यबुद्धौ वह्नित्वावच्छेदेनमहानसीयत्वनिर्णय एवकारणं अन्यथा वह्नित्वावच्छेदेन महानसीयत्वं वह्नित्वसामानाधिकरण्येन

त. महानसीयत्वविरहं च अवगाहमानात् संशयादपि तादृशविशिष्टवैशिष्ट्यबुद्ध्यापत्तेः वह्नित्वावच्छेदेन महानसीयत्वाभावाप्रकार
कत्वघटितस्य सामानाधिकरण्येन निर्णयत्वस्य तत्साधारणत्वात् न च सामानाधिकरण्यमात्रेण महानसीयत्वप्रकारकत्वमेव तत्र
४ निवेशनीयं वह्नित्वावच्छेदेन महानसीयत्वावगाहिनिर्णयस्य असंग्रहापत्तेः न च सामानाधिकरण्येन महानसीयत्वाभावाप्रकारक
त्वघटितनिर्णयत्वेन तस्मात् पृथगेव कारणत्वं उभयसाधारणनिर्णयत्वस्यैकस्याभावादिति वाच्यं तथा सति वह्नित्वावच्छिन्नमहा
नसीयत्वविशिष्टवैशिष्ट्यवह्नित्वस्येव तादृशनिर्णयजन्यतावच्छेदकत्वात् अन्यथा सामानाधिकरण्येन तन्निर्णयजन्यबुद्धौ व्यभि
चारप्रसंगात् सामानाधिकरण्येन निर्णयस्य पुनरनायत्या कारणवैशिष्ट्यादिकं कार्यतावच्छेदकमभ्युपेयं अन्यथा यत्र प्रथमं वह्नि
त्वसामानाधिकरण्येन उपनीतस्य महानसीयत्वाभावस्य ज्ञानं अथ वह्नित्वावच्छिन्ने लौकिके महानसीयत्वनिर्णयः संनिकर्षश्च तदनंत
रं वह्नित्वसामानाधिकरण्येन महानसीयत्वविशिष्टवैशिष्ट्यज्ञानस्योदयात् तत्र व्यभिचारापत्तेः अथ अवच्छेदकावच्छेदेन तन्निर्णयस्य का
र्यतावच्छेदकं अवश्यं कारणवैशिष्ट्यं तु अन्यथा तादृशस्थले विशिष्टवैशिष्ट्यबुद्धिविशेषस्य तदजन्यत्वापत्तेः वह्नित्वावच्छेदेन महानसीय ४
त्वावगाहिनिर्णयजन्यविशिष्टवैशिष्ट्यबुद्धौ व्यभिचारो दुर्वारः तथा च सामानाधिकरण्येन निर्णयस्य कार्यतावच्छेदककोटौ वह्नित्वावच्छि
न्नत्वसमवायत्वानिरूपितावच्छिन्नसंसर्गताकत्वनिवेशेन तदुपपादने तु सामानाधिकरण्येन महानसीयत्वनिर्णयात् अवच्छिन्नविशि
ष्टबोधोऽभ्युपगमेऽपि न क्षतिरिति मैवं अवच्छिन्नविशिष्टवैशिष्ट्यबोधं प्रति अवच्छिन्नविशेषणतावच्छेदकप्रकारकनिर्णयघटित

सामग्र्या एव प्रयोजकत्वोपगमात् अन्यथा सामानाधिकरण्येन महानसीयत्वनिर्णयसत्वे तदनंतरं तदवच्छेदेन महानसीयत्वा
वगाहिसंदेहसत्वे वह्नित्वावच्छेदेन महानसीयत्वावगाहिविशिष्टवैशिष्ट्यबोधो दुर्वार एव भवेदिति चेत् एवमपि यत्र ज्ञानानंतरं ता
दृशसमूहालंबनः परामर्शो वह्नित्वावच्छेदेन महानसीयत्वावगाही तादृशसंदेहानुमितेरापत्त्या अन्वयिपरामर्शत्वावच्छेदके पक्षमुख्यवि
शेष्यत्वस्य आवश्यं निवेशनीयत्वात् ननु वह्नित्वावच्छिन्नपक्षकपरामर्शानां वह्निमुख्यविशेष्यकत्वाधारणात् कार्यतावच्छेदकं तावतैव क
थितसंदेहानुमितिवारणासंभवात् न च भावसाध्यके साध्यज्ञानस्य क्वचित् प्रतिबंधकत्वे मानाभावात् अभावपक्षकपरामर्श
कार्यतावच्छेदकं तु मुख्यविशेष्यता न निवेश्यते प्रयोजनाभावात् इति चेत् एवमपि प्रतियोगितया जलव्याप्यवान् अभेदो भेदव्या
प्यवती पृथिवी प्रतियोगितया भेदव्याप्यवान् अभावः अभावव्याप्यवती पृथिवी इत्येवमाकारकसमूहालंबनपरामर्शा
त् पृथिवी इतरभेदवती इतरभेदाभाववती वा इति संदेहापत्तेः न च मुख्यविशेष्यता कार्यतावच्छेदककोटौ निवेश्यत इति नो
चितं विशेष्ये विशेषणन्यायेन अनुमितेः इतरभेदसाध्यकपरामर्शघटितसामग्र्या एव प्रयोजकत्वोपगमात् इतरव्याप्यवान् भेदः
भेदव्याप्यवती पृथिवी इत्येवमाकारकसमूहालंबनपरामर्शात् अनुमित्यनुत्पादसंभवात् समूहालंबनपरामर्शघटितसामग्र्याः
प्रयोजकत्वं तत्कल्पने गौरवात् किंतु प्रत्येकप्रयोजकसमावेशात् तत्र समूहालंबनानुमितिरेवोत्पद्यते यद्धर्मावच्छिन्नस्य पुनः
अज्ञातस्य साध्यतया अनुमितिविषयत्वं तद्धर्मावच्छिन्नपक्षतासाध्यताकपरामर्शयोः परस्परं सहकारित्वं कल्प्यते अन्यथा पृ

त. थिव्यां इतरभेदव्याप्यस्य इतरभेदप्रमेयत्वव्याप्यस्य च परामर्शात् उत्पन्नायां अनुमितौ साध्यज्ञानप्रतिबंधकत्वे व्यभिचारापत्तेः
शुद्धभेदत्वावच्छिन्नस्य साध्यज्ञानस्य तु प्रतिबंधकता नास्त्येव नवातदवच्छिन्ना ज्ञातसाध्यकानुमितिः अत एव तत्र परामर्श
५ योः परस्परं सहकारित्वं नवाभेदपक्षकाभावपरामर्शानो इति पूर्वोक्तसंदेहापादनं नुघटत इति वाच्यं एवमपि परामर्शघटितसा
मग्र्याः प्रयोजकत्वांतरस्वीकारे गौरवात् समानविषयकशाब्दसामग्रीकाले पृथिव्यामितरभेदं तत्र च प्रमेयत्वं अनुमिनुयां +इत्य+ एवं
समूहालंबनेच्छायां सत्यां विशिष्टसाध्यकानुमितौ उत्तेजकीभूतायाः पृथिव्यां प्रमेयेतरं अनुमिनुयां एवमाकारकेच्छाया अभा
वात् उत्पद्यमानानुमितेः समूहालंबनरूपत्वात् तत्र व्यभिचारतादवस्थ्याच्च यदि तु विशेष्ये विशेषणन्यायेनानुमितौ पृथक् प्रति
बंधकत्वेव नास्ति कुत्रोत्तेजकत्वमिच्छायाः किंतु इतरभेदत्वावच्छिन्नोद्देश्यताकानुमितित्वावच्छिन्नं तदवच्छिन्नविधेयताकानुमिति
त्वावच्छिन्नं प्रमेयेतरभेदत्वावच्छिन्नविधेयताकानुमितित्वावच्छिन्नं प्रति त्रयी प्रतिबंधकता चरमप्रतिबंधकतायामेव विशि
ष्टसाध्यकानुमितिगोचरेच्छोत्तेजिका विशेष्ये विशेषणन्यायेन अनुमितिविधेयता क्वचिद्विधेयताद्वयविशिष्टानुमितिसाम ५
ग्र्या क्वचिद्विशिष्टधर्मावच्छिन्नसांसर्गिकविधेयताकानुमितिसामग्र्या इत्येवं विशेषसामग्रीद्वयेन निर्वक्ष्यते इत्युच्यते तदा विशिष्टस्य
वात्रसत्प्रतिपक्षादौ सत्युत्पद्यमानायां समूहालंबनानुमितौ व्यभिचारो दुर्वारस्तदापि स्यात् तत्रानुमितेः अनभ्युपगमे तत्र
असमानविषयकप्रत्यक्षादेः अनुत्पादाय विशिष्टबाधात्वं अनिवेश्य परामर्श तदभावविशिष्टैकतरपरामर्शघटितसामग्र्याः

प्रतिबंधकताद्वयं विशिष्टबाधाभावं निवेश्य द्वितीयपरामर्शघटितसामग्र्याः प्रतिबंधकत्वं इत्येवं प्रतिबंधकतात्रयं इत्येव महागौ
रवप्रसंगात् एतेन वह्निव्याप्यधूमवान् अभावव्याप्यवांश्च पर्वत इति समूहालंबनपरामर्शे वह्नेर्महानसीयत्वे अभावस्य महा
नसीयवह्निप्रतियोगिकत्वे लाघवं इत्येवं समूहालंबनलाघवज्ञाने महानसीयेतरवह्न्यभाववान् पर्वत महानसीयवह्निप्रतियो
गिकेतराभावाभाववांश्च इति तत्र बाधज्ञाने वा प्रतिबंधकीभूतसत्प्रतिपक्षाभावेन संदेहानुमितेर्दुर्वारतया प्रकृतेपि तत्स्वी
कारे क्षतिविरहात् पूर्वोक्तविशेष्यविशेषणन्यायेन विशिष्टविषयकानुमितिजनने परामर्शयोः परस्परं सहकारित्वकल्प
नेपि न क्षतिः यत्तु पूर्वोक्तेतरबाधादिस्थले महानसीयेतरवह्निविधेयकानुमितेः प्रतिबंधात् अर्थतो वह्नित्वेनैव रूपेण म
हानसीय एव वह्निर्भासते न तु महानसीयत्वमपि तत्र प्रकारीभूय भासते अव्यापकतावच्छेदकधर्मस्य अनुमितौ प्रकारता
स्वीकारे अतिप्रसंगात् अतः पूर्वोक्तानुमितिर्वह्निमान् अभाववान् इत्याकारका न संशयरूपेति न च महानसीयेतरवह्ने
र्बाधबुद्धावपि महानसीयेतरवह्नेर्वह्नित्वेन भाने बाधकाभाव इति वाच्यं न च महानसीयेतरवह्नेर्बाधबुद्धावपि महानसीये
तरवह्नेर्वह्नित्वेन भाने बाधकाभाव इति वाच्यं महानसीयेतरवह्नित्वाभाववच्छिन्नप्रकारताकपर्वतत्वावच्छिन्नोद्देश्यताकानुमितौ
कथितबाधबुद्धेर्मणिमन्त्रादिन्यायेन प्रतिबंधकत्वात् अथैवं महानसीयवह्नित्वाद्यवच्छिन्नविधेयतानिरूपितपर्वतत्वावच्छिन्नोद्देश्यताका
नुमितौ कथितबाधबुद्धेः कारणत्वेव साधीयसी इति चेन्न महानसीयवह्निसाध्यकपरामर्शादपि तादृशानुमित्युत्पत्त्या व्यभिचारप्रस

त.त. गात् नच शुद्धवह्नित्वावच्छिन्नविधेयतानिरूपितपर्वतत्वावच्छिन्नोद्देश्यताकत्वे सति महानसीयत्वप्रकारतानिरूपित
वह्नित्वावच्छिन्नविशेष्यताख्यप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताकानुमितौ तादृशेतरबाधबुद्धेः कारणता म
६ हानसीयवह्निव्याप्यवान् इति परामर्शजन्यानुमितौ विधेयता न शुद्धवह्नित्वावच्छिन्ना वह्निव्याप्यपरामर्शजन्यानुमितौ प्र
कारताख्यविशेष्यता न महानसीयत्वप्रकारतानिरूपितेति वाच्यं एवं सति इतरबाधजन्यानुमितेरपि असंग्रहाप
त्तेः तद्विधेयतायां महानसीयत्वेनाप्यवच्छेदिका अन्यथा महानसीयवह्निमान् इति सिद्धिकाले पि तदापत्तेः नच शुद्धवह्नि
त्वावच्छिन्नविधेयताकानुमितित्वापि विशिष्टवह्नित्वावच्छिन्नप्रकारताकसिद्धिः प्रतिबंधिका वह्नित्वनिष्ठावच्छेदकताकप्रका
रतायां इतरानवच्छिन्नत्वानिवेशेन तस्या अपि प्रतिबंधकतावच्छेदकाक्रांतत्वात् यद्यप्यत्र निर्प्रायत्वं नवह्न्यभावाप्रकारकत्वघटितं
पर्वतो वह्निमान् महानसीयवह्न्यभाववान् इति सिद्धेरसंग्रहात् नापि वह्निसामान्याभावाप्रकारकत्वघटितं पर्वतो महानसीय
वह्निमान्वा इति संशयसाधारण्यात् तस्मात् शुद्धवह्नित्वावच्छिन्नत्वं प्रकारतायां अवश्यं निवेशनीयं तथापि पर्वतो महा ६
नसीयवह्निमान् इति सिद्धेः प्रतिबध्यतायां महानसीयत्ववह्नित्वातिरिक्तधर्मानवच्छिन्नविधेयताकत्वमेव अवच्छेदकं वक्तव्यं
अतः शुद्धवह्नित्वावच्छिन्नविधेयताकानुमितेरपि संग्राह्यो यदि तु वह्न्यनुमितिर्जायतां महानसीयवह्न्यनुमितिर्जायतां

इतीच्छयोः प्रयोजकत्वात् नोभयसाधारणं प्रतिबंधकत्वमेकं संभवति तदा उभयानुमित्योः विभिन्नाभ्यां रूपाभ्यां प्रतिबध्यत्वमा
स्तां इति वाच्यं एवमपि वह्निमान् इति सिद्धिकाले इतरबाधजन्यानुमित्यनापत्तेः नच तत्र अनुमित्यभ्युपगमे इतरबाधसहकृ
तपरामर्शवह्निपरामर्शत्वादिना अनुमितिसामग्र्या भिन्नविषयके यत्प्रत्यक्षादौ पृथक्प्रतिबंधकत्वाभ्युपगमौ तु कॢप्तायां वह्निमान्
इति सिद्धिविरहसहकृतवह्निव्याप्यपरामर्शत्वादिनैव प्रतिबंधकतायां विनिर्वाह इति लाघवात् भवत्येव तत्रानुमितिरिति वाच्यं
महानसीयवह्निव्याप्यवान् वह्निव्याप्यवांश्च पर्वत इति समूहालंबनपरामर्शजन्यानुमितौ तथापि व्यभिचारात् तथावि
धबाधाभाववहितोत्तरोत्पन्नतादृशानुमितित्वस्य इतरबाधकार्यतावच्छेदकत्वे महागौरवात् इत्युपाध्यायमतं तदसत् पर्वतीये
तरवह्न्यभाववान् महानसीयेतरवह्न्यभावाभाववांश्च पर्वत इतीतरबाधकाले अनुमित्यनापत्तेः तदीयेतरवह्न्यभाववान्
इति बुद्धेर्वैलक्षण्यासंपादकत्वापत्तेश्च गौरवस्य अनन्यगत्या सोढव्यत्वात् इत्यपास्तं संदेहानुमित्यभ्युपगमेपि विशिष्टबाधादि
कालीनसमूहालंबनानुमितौ व्यभिचारतादवस्थ्यात् साध्यतावच्छेदकप्रकारकज्ञानस्य प्रतिबंधकतायां दुर्वचत्वात् वस्तुतस्तु
महानसीयवह्न्यभावो लघुः अतो वह्निव्याप्यवान् पर्वत इति समूहालंबनज्ञानकाले महानसीयवह्न्यभावभिन्नाभावाभाववान् पर्व
त इति इतरबाधकालीनतादृशपरामर्शकाले पर्वतो महानसीयवह्निमान् इति शाब्दबोधवारणाय तादृशलाघवज्ञानादिविशिष्ट
तादृशपरामर्शस्य तत्र प्रतिबंधकत्वेऽध्रुवे तत्प्रतिबध्यतावच्छेदकं परोक्षत्वं जातिरेव न तु शाब्दत्वादिकं विरोधिसामग्रीकालेजि

ज्ञानस्यापरोक्षानभ्युपगमात् इच्छोत्तेजकत्वानुरोधेनापि विशेषप्रतिबंधकतायां अपर्यवसानात् विरोधिबुद्धिकालीनस्यैव विरो
त. धिबुद्धिसामग्रीकालीनस्यापि इच्छाजन्यज्ञानस्य आहार्यत्वादाहार्यपरोक्षस्यानभ्युपगमात् परोक्षत्वं जातिः बाधबुद्धिप्रतिबध्यतावच्छे
७ दकतया सिद्धानुमितावपीति प्रत्यक्षत्वेन बाधबुद्धिप्रतिबध्यतायाश्चाक्षुषत्वादिनैवावच्छेदात् अन्यथा चाक्षुषसामग्रीविरहकाली
नचाक्षुषेच्छाया अप्युत्तेजकतापत्त्या तया स्पार्शनजननापत्तेः चाक्षुषसामग्रीविशिष्ट चाक्षुषेच्छानां उत्तेजकत्वपक्षेपि षण्णाम
भावानां मेकत्रनिवेशापेक्षया चाक्षुषत्वाद्यवच्छेदेन प्रतिबध्यता कल्पनस्यैव उचितत्वात् अन्यथा तेषां परस्परं विशेष्यविशेषण
भावे विनिगमनाविरहेण बहुतरगुरुप्रतिबंधकतापत्तेः अस्तु वा जन्यप्रत्यक्षत्वावच्छेदेनैव बाधबुद्धिः ननु जन्यज्ञानत्वावच्छेदेन जन्य
त्वस्य गुरुत्वाद्विनिगमनाविरहग्रस्तत्वाच्च जन्यप्रत्यक्षत्वंजातिरेव अनुमित्यादस्तु बाधबुद्धिप्रतिबध्यतापरोक्षत्वं जात्यैव अवच्छि
द्यते अत्र केचित् भिन्नविषयकानुमितिसामग्र्या अनुमित्साविशिष्टायाया वा तस्याः प्रतिबध्यतावच्छेदकतया सिद्धाया अनु ७
मितित्वावत्तया जात्या सांकर्यान्न परोक्षत्वं जातिः यत्तु अनुमित्साविशिष्टभिन्नविषयका नुमितिसामग्री प्रतिबध्यतावच्छेद
के समानविषयकप्रत्यक्षसामग्र्यभावोवश्यं निवेशनीयः इतरथा प्रत्यक्षेच्छाविशिष्टप्रत्यक्षसामग्रीकाले तथाविधानुमि
तिसामग्रीकाले च घटाद्युन्मीलितं चक्षुः पटं नाहं न पश्यामि इति न्यायेन भिन्नविषयकप्रत्यक्षानुत्पत्त्यापत्तेः एवं समानविष
यकशाब्दसामग्र्यभावोपि तुल्ययुक्त्या प्रवेशनीयः तयोरेकत्रनिवेशे विशेष्यविशेषणभावे विनिगमनाविरहेण प्रत्य

क्षत्वशाब्दत्वावच्छेदेन पृथगेव प्रतिबंधकता युज्यत इति नानुमित्सान्यज्ञानत्वं जातिसिद्धिरिति तच्चिन्त्यं तथापि परमाणुः गुरु
त्वव्याप्यवान् इति परामर्शघटितानुमितिसामग्र्याः केवलं समानविषयकशाब्दसामग्र्यभावं निवेश्य अनुमित्सज्ञानत्वावच्छि
न्ने प्रत्येव प्रतिबंधकताकल्पनात् तत्प्रतिबध्यतावच्छेदकजातेः प्रत्यक्षव्यावृत्तत्वे भिन्नविषयकप्रत्यक्षेप्रतिबंधकतान्तराकल्पनाप
त्तेः यद्यपि समानविषयकोपनीतभानं प्रति अनुमितिसामग्री तथाविधावश्यं पृथक्प्रतिबंधिका इतरथा भिन्नविषयकज्ञा
ने तस्याः प्रतिबंधकत्वेपि समानविषयकप्रत्यक्षापत्तिवारणासंभवात् भिन्नविषयकत्वस्य वह्नित्वावच्छिन्नप्रकारतानिरूपि
तपर्वतत्वावच्छिन्नविशेष्यताभिन्नमुख्यविशेष्यताकत्वरूपस्य पर्वतो वह्निमान् इत्युपनीते मानसावृत्तित्वात् तथा च समानवि
षयकोपनीतभानवृत्ति प्रतिबध्यतावच्छेदकीया वह्निमत्पर्वतविशेष्यता तद्भिन्नप्रकारता भिन्नप्रकारताभिन्नविषयताकत्वेन भिन्नविष
यकप्रत्यक्षसाधारणेन अवच्छिद्यतां एवं गुरुत्वानुमितिसामग्र्याः समानविषयकोपनीतभानगता प्रतिबध्यतापि सामान्यतः प्रत्यक्ष
त्वेनैव अवच्छिद्यतां विषयानिवेशप्रयोजनाभावात् अतो भिन्नविषयकानुमितिसामग्री प्रतिबध्यतावच्छेदकजातेः प्रत्यक्षमात्रवृत्ति
त्वेपि न क्षतिः तथापि इच्छाविशिष्टगुरुत्वानुमितिसामग्र्या द्वयी प्रतिबंधकता एकानुमितित्वप्रकारकेच्छावैशिष्ट्यं निवेश्य तस्या
तु समानविषयकोपनीतभानगतप्रतिबध्यताया विषयानवच्छिन्नत्वेपि न क्षतिः अपरा पुनः अनुमितिगोचरेच्छावैशिष्ट्यं निवेश्य त
त्रभिन्नविषयत्वं अवश्यं प्रतिबध्यतावच्छेदके वक्तव्यं अन्यथा गुरुत्ववत्परमाणौ ज्ञानं प्रत्यक्षं जायताम् इति इच्छाकाले ज्ञानत्वे
न अनुमितिगोचरेच्छाया विशिष्टानुमितिसामग्रीसत्त्वात् उपनीतभानानुदयप्रसंगात् समानविषयकोपनीतभानेपि प्र

यक्षत्वप्रकारिकां इच्छां उत्तेजकीकृत्य पृथगस्याः प्रतिबंधकत्वं नास्त्येव सर्वेपि वा तत्प्रतिबध्यतावच्छेदके समानविषयत्वस्यअ
त· वश्यं प्रवेशः इतरथा समानविषयकप्रत्यक्षसामग्रीसत्वे तथापि इच्छायां भिन्नविषयकप्रत्यक्षापत्तेः एवं च अनुमितिगोच
रेच्छाविशिष्टानुमितिसामग्रीप्रतिबध्यतावच्छेदकतया प्रत्यक्षसाधारणी जातिर्दुर्वारा अन्यथा भिन्नविषयकप्रत्यक्षे तस्याः पृथक्प्रति
८ बंधकतापत्तेरित्याकुलत्वं दसत अनुमितिगोचरेच्छाविशिष्ट गुरुत्वानुमितिसामग्र्या अपि प्रतिबंधकतावच्छेदककोटौ समानविषयकप्र
त्यक्षसामग्रीविशिष्टप्रत्यक्षत्वप्रकारकेच्छाविरहस्य अवश्यं निवेशनीयत्वात् अन्यथा पूर्वोक्तसमूहालंबनेच्छाकाले नांतरीयकघटादिप्र
त्यक्षानुदयापत्तेः तथा च प्रत्यक्षत्वावच्छिन्नं प्रत्येव पृथगस्याः प्रतिबंधकता युज्यते न तु शाब्दसाधारण ज्ञानत्वावच्छिन्नं प्रति तथासति शाब्द
सामग्र्यभावोपनीतभानसामग्र्यभावयो विशेष्यविशेषणभावविनिगमनाविरहेण कारणताधिक्यप्रसंगात् किंच अनुमितिसा
मग्रीप्रतिबध्यतावच्छेदकजातिः प्रत्यक्षव्यावृत्तैव स्वीकरणीया न तु बाधसत्प्रतिपक्षप्रत्यक्षसामग्रीप्रतिबध्यतावच्छेदकजातेः अनु
मितिव्यावृत्तत्वं अनुमितौ त्रयाणामपि पृथक्प्रतिबंधकतापत्तेः अत्राक्षिपंति बाधाभावसत्प्रतिपक्षाभावसमानविषयकप्र
त्यक्षसामग्र्यभावघटिततायां हेतुभेदात् अननुगतपरामर्शघटिततया विभिन्नमूर्तेरनुमितिसामग्र्या भिन्नविषयकप्रत्यक्षे पृथक् ८
प्रतिबंधकतासंख्यानः शरीरतश्च गरीयसी प्रत्यक्षसामग्र्या अनुमितौ पृथक्प्रतिबंधकता द्रव्यग्राहकवह्निः इंद्रियस्वरूपभेदभिन्नतया सं
ख्यातो बाधप्रतिपक्षाद्यभावाघटिततया शरीरतश्च लघीयसी समानेंद्रियजबाधबुद्धेः प्रत्यक्षप्रतिबंधकत्वेपि अनुमितिप्रतिबंधकता
या तत्प्रवेशात् बाधसत्वे प्रत्यक्षस्यैव अनुमितेरपि तत्तत्एवानुत्पादात् चक्षुःसंयोगविशिष्टचक्षुःसंयोगसंयोगरूपायाः प्रत्यक्षसाम
ग्र्याः संख्यातो लाघवस्य अतिस्फुटत्वात् वैशिष्ट्यमत्र स्वावच्छेदकावयवावच्छिन्नपर्वतवह्निसंयोगावच्छेदकावयवावच्छिन्नत्व समवाय

घटितसामानाधिकरण्यं द्वयमुभयं स्वस्मिन् स्ववैशिष्ट्याभावात् केवलपर्वतचक्षुःसंयोगकालेन समानविषयकानुमित्यनुप
पत्तिः पर्वतवह्निसंयोगावच्छेदकावयवावच्छेदेन एकस्यैव चक्षुःसंयोगद्वयसत्वे मानाभावात् अस्तु वा स्वावच्छेदकावच्छिन्न
संयोगावच्छेदकावच्छिन्नत्वघटितउभयसंसर्गेण पर्वतचक्षुःसंयोगविशिष्टवह्निचक्षुःसंयोगत्वेनैव प्रतिबंधकता न चैवं पर्व
तेन समं एकस्य खंडचक्षुषो वह्निना समं परस्य संयोगस्तत्र समवायघटितसामानाधिकरण्याभावात् अनुपपत्तिर्वाच्या स्वस
मानाधिकरणचक्षुर्न्यूनवृत्तिचैत्रीयत्वात् जातिसामानाधिकरण्यस्य स्वसमवायिचक्षुःसंयुक्तमनःसंयुक्तचक्षुःसमवायस्य वा सं
सर्गैकदेशत्वात् इति न चैवं प्रत्यक्षसामग्र्या अनुमितिप्रतिबंधकतायां भिन्नविषयकानुमितिसामग्र्यभावो निवेशनीयः अनुमितिसा
मग्र्या भिन्नविषयकप्रत्यक्षप्रतिबंधकतायां लघुतरः समानविषयकप्रत्यक्षसामग्रीविरह इत्यतोनुमितिसामग्रीप्रतिबंधकत्वेव ल
घी इति वाच्यं अनुमितिसामग्रीप्रतिबंधकतावच्छेदककोटौ निविष्ट प्रत्यक्षसामग्र्या भिन्नविषयकानुमितिसामग्र्यभावनिवेशनअ
तिगुरुत्वात् अन्यथा वह्निघटोभयानुमितिसामग्रीकाले प्रत्यक्षसामग्रीकाले घटप्रत्यक्षापत्तेः न चेष्टापत्तिः वह्न्यनुमितेरपि उत्पत्त्यापत्तेः
वह्निप्रत्यक्षसामग्र्या घटानुमितिसामग्रीविरहविशिष्टया असत्वात् घटानुमितिसामग्र्यां घटप्रत्यक्षसामग्रीविरहनिवेशे तु बुद्धिप्रत्यक्षसा
मग्र्यामपि घटानुमितिसामग्रीविरहः प्रवेशनीय एव न्यायतौल्यात् तथा च अनुमितिसामग्रीद्वयघटितानुमितिसामग्री प्रतिबंधकतापृथ
धकल्पयितुमुचिता किंतु प्रत्यक्षसामग्रीद्वयघटितप्रत्यक्षसामग्रीप्रतिबंधकत्वैव इति बाधबुद्धिप्रतिबध्यतावच्छेदकजातेः अनुमितिव्यावृत्तत्वैव
इति उक्तानानात्व तुच्छ अनुमितिसामग्र्याः प्रतिबंधकतायां प्रत्यक्षेच्छादीनां उत्तेजकतया प्रत्यक्षत्वावच्छिन्नं प्रत्येव प्रतिबंधकता पर्यवसानात्

त. नच अनुमितीच्छाविशिष्टानुमितिसामग्रीप्रतिबंधकतायां इच्छानोत्तेजिका शाब्दसामग्र्यभावसमानविषयकशाब्दसामग्र्यभावयो
रेकत्रानिवेशो विशेषपर्यवसानं तनुनशक्यं गुरुत्वानुमितिसामग्रीप्रतिबंधकतायां प्रत्यक्षसामग्र्यभावानिवेशात् तत्प्रतिबध्यतावच्छेदकजाते:
८ प्रत्यक्षसाधारणत्वं उपपादितंप्राक् इतिवाच्यं एवंसतिप्रत्यक्षसामग्र्या घटितायो लघ्वो गुरुत्वानुमितिसामग्र्याएवप्रत्यक्षेपृथक्प्रतिबंध
कताया उचितत्वात् ननु सामग्रीद्वयप्रवेशगुर्व्यो: प्रत्यक्षसामग्र्या: समानविषयिण्यां अनुमितौ प्रतिवंधकत्वेतरकल्पने गौरवात् यदपि
समानविषयकानुमितिप्रत्यक्षसामग्र्या भिन्नविषयकशाब्दानुमितिसामग्र्योरेकत्रनिवेशो प्रतिबंधकत्वा धिक्यात् अनुमितित्वाद्यवच्छे
देनैव प्रतिबंधकता युज्यत इति तन्न यत्रविषये प्रत्यक्षसामग्रीकाले भिन्नविषयकानुमितिसामग्रीक — पिनावतीर्णा तत्रतादृशशाब्द
सामग्र्यभावंनिवेश्य प्रतिवंधकत्वध्रुवे तत्प्रतिबध्यताया: परोक्षत्वेनैव अवच्छेददनुमिति — तज्जातित्वस्तथात्वसमानविषयकानुमितौ
पृथक्प्रतिबंधकतापत्ते: वस्तुतस्तु अनुमितिसन्यज्ञानत्वादिजाते र्लिसत्साधारणत्वात् जन्यप्रत्यक्षत्वजात्यवच्छेदेनेव अनुमिति
सामग्रीप्रतिबध्यत्वमुचितं इति परोक्षत्वजातिसिद्धिर्निष्प्रत्यूहा अनुभवत्वंतु साक्षात्कारत्वव्याप्यमेवेति ननु तदादाय संकरस्सं
भावनापीति अतएवसमानविषयकप्रत्यक्षसामग्रीविरहाघटित गुरुत्वानुमितिसामग्र्या अनुमितित्वासहकृतायाभिन्नविष
यकप्रत्यक्षप्रतिबंधकत्वात्तर गुरुतरं भिन्नविषयकानुमितिसामग्रीविरहासहकृतप्रत्यक्षसामग्र्या: प्रत्यक्षेच्छाविशिष्टाया:
समानविषयकानुमितौ पृथक्प्रतिबंधकत्वं लघुतरं अंतस्तदेवकल्पनार्हमिति विनिगमकं निरस्तं प्रत्यक्षसामग्र्या अपि अननु
गतदोषाभावघटिततया गुरुत्वात् अनुमितिसामग्र्या जन्यप्रत्यक्षत्वावच्छिन्नंप्रत्येव प्रतिबंधकतायां आवश्यकत्वाच्च किंच

अनुमितिगोचरेच्छात्वेन अनुमितिसामग्रीप्रतिबंधकतायां इच्छायां निवेश: ज्ञानंजायतां इतीच्छाकाले सत्यामपि अनुमितिसा
मग्र्यां प्रत्यक्षत्वेन इच्छया भिन्नविषयकप्रत्यक्षोदयात् नाप्यनुमितित्वप्रकारकेच्छात्वेन वह्निमत्पर्वतज्ञानंजायतां इतीच्छाविशिष्टा
नुमितिसामग्रीसत्वे प्रत्यक्षेच्छया भिन्नविषयप्रत्यक्षापत्ते: नच समानविषयकप्रत्यक्षादौ अनुमितित्वप्रकारकेच्छात्वेनभिन्नविषय
कानुमितिगोचरेच्छात्वेन वैशिष्ट्यप्रतिबंधकत्वमितिदेश्यं प्रत्यक्षत्वेन अनुमितिगोचरेच्छायामपि सत्यां प्रत्यक्षानुदयप्रसंगात् न
चो अनुमितिसत्वनिधर्मानवच्छिन्नानुमितिविषयताकेच्छात्वेन तन्निवेश: तथापि स्व:परस्वोवा चैत्रस्यानुमितिर्जायतां इति इच्छास
त्वे चैत्रस्याद्यप्रत्यक्षानुदयप्रसंगात् नापिवह्निमत्पर्वतविषयतात्वावच्छिन्नप्रकारतातिरिक्तानुमितिसमवेतवृत्तिनिरवच्छिन्न
प्रकारतातिरिक्तायाप्रकारता तदनिरूपितानुमितिवृत्तिविशेष्यताकत्वमिच्छायांप्रवेश्यं इतिशंक्यं एवमपि वह्निमत्पर्वतविषयि
ण्यनुमितिर्ज्ञानमनुभवोवा जायतां इतीच्छानां संग्रहेपि प्रत्यक्षान्यज्ञानं जायतामितीच्छाया असंग्रहात् नच प्रत्यक्षान्यत्वप्र
कारताभिन्नत्वमपि विशेष्यत्वनिरूपकप्रकारतायां निवेश्यं सापिसंग्राह्येतिवाच्यं एवंप्रत्यक्षान्यज्ञानं जायतां इति इच्छास
त्वे सत्यां अनुमितिसामग्र्यां शाब्दत्वेन इच्छया भिन्नविषयकशाब्दबोधानुपपत्ते: नच वह्निमत्पर्वतविषयत्वप्रकारतानिरूपि
तत्वमपि इच्छाविषयतायां निवेश्य वह्निमत्पर्वतविषयकप्रत्यक्षान्यज्ञानंजायतां इतीच्छासत्वेतु नभवत्येवभिन्नविषयकशा
ब्दमितिवाच्यं समानविषयकशाब्दसामग्र्यां सत्यामपि तदनुत्पादापत्ते: नचसमानविषयकशाब्देच्छाविशिष्टशाब्दसा

त. मग्र्याः उत्तेजकत्वात् न भिन्नविषयकशाब्दानुपपत्तिरिति वाच्यं सर्वत्र तादृशस्थले अनुमितिसामग्र्याः प्रतिबंधिकाया
अभावात् भिन्नविषयकप्रत्यक्षापत्तेश्च वज्रलेपत्वात् न च तत्र शाब्देच्छाविशिष्टशाब्दसामग्र्याः प्रतिबंधादेव न भिन्नविषय
२० कप्रत्यक्षं शाब्दसामग्र्याः प्रतिबंधकतायामपि इच्छाविशिष्टसमानविषयकप्रत्यक्षसामग्रीविरहप्रवेशेन वह्निमत्पर्वत
विषयकं शाब्दस्य ज्ञानं जायतामितीच्छाविशिष्टप्रत्यक्षसामग्रीसत्त्वे शाब्दसामग्र्या अपि प्रतिबंधासंभवात् नाप्यनुमित्साघ
टितसामग्र्येव तत्र प्रतिबंधः तस्याः समानविषयकप्रत्यक्षसामग्र्या उत्तेजनात् घटप्रत्यक्षं जायतामितीच्छयापि उत्तेजनसंभ
वात् अथ प्रत्यक्षान्यज्ञानं जायतां शाब्दान्यज्ञानं जायतां घटप्रत्यक्षं जायतामितीच्छासत्त्वे घटप्रत्यक्षे इष्टापत्तिरिति चेत् एतादृ
शस्थले घटप्रत्यक्षोत्पत्त्यापि इच्छाविषयनिर्वाहात् सहकृते बलवत्यानुमितिसामग्र्यैव फलजननात् अनुमित्सुत्पादविषयताद्या
श्रयसिध्या तथा त्वस्यैव उचितत्वात् विनिगमनाविरहेण कस्यापि फलस्यवानुत्पादात् इत्थं च अनुमितित्वं वह्न्यनुमितित्वादि
मात्रप्रकारकेच्छानां तादृरूप्येणैव प्रतिबंधकतावच्छेदके निवेशः प्रत्यक्षत्वशाब्दत्वप्रकारकेच्छासहकृत प्रत्यक्षसामग्र्यास्त्वाव
पि तत्र प्रवेश्यो न प्रतिबध्यतावच्छेदकस्य प्रत्यक्षव्याप्यत्वेपि न क्षतिः उपनीतसमानविषयकप्रत्यक्षस्थलीयप्रतिबध्यतावच्छेद २
कस्यैव भिन्नविषयकप्रत्यक्षसाधारणस्योक्तत्वात् सामग्रीद्वयाभावयोः एकत्र प्रवेशापेक्षया पृथक् प्रतिबंधकतायां एवोचितत्वा
त. गुरुत्वानुमितिसामग्र्या अनुमितित्वप्रकारकेच्छाविशिष्टायाः प्रतिबध्यत्वमपि प्रत्यक्षत्वेन अवच्छेत्तुमुचितं +के+ समानविषय

कोपनीतभाने प्रतिबंधकतां तत्रावश्यकत्वेन तत्र विषयनिवेशे प्रयोजनाभावात् प्रत्यक्षान्यज्ञानत्ववह्निविषयकप्रत्यक्षान्य
ज्ञानत्वमात्रप्रकारकेच्छानां तादृरूप्येण प्रवेशे च प्रत्यक्षं प्रति या प्रतिबंधकता तत्र प्रत्यक्षत्वप्रकारकेच्छाविशिष्टसमानविषयकप्र
त्यक्षसामग्र्यभावस्य प्रवेशः शाब्दं प्रति या प्रतिबंधकता तत्र समानविषयकशाब्दसामग्रीविरहस्यैव प्रवेशो न त्विच्छापि साम २३
ग्रीघटकत्वेन प्रवेश्या एवं शाब्दान्यत्वप्रकारकेच्छाघटितसामग्र्या द्वयी प्रतिबंधकता शाब्दं प्रति शाब्देच्छाघटितसमानविषय
कशाब्दसामग्रीविरहमंतर्भाव्य प्रत्यक्षं प्रति केवलप्रत्यक्षसामग्रीविरहमंतर्भाव्य शुद्धज्ञानत्वप्रकारकेच्छायास्तादृरूप्येणप्र
वेशे तु शाब्दत्वप्रकारकेच्छाविशिष्टसमानविषयकशाब्दसामग्र्याः प्रत्यक्षत्वप्रकारकेच्छाविशिष्टसमानविषयकप्रत्यक्षसा
मग्र्याश्चाविरहप्रवेश्या भिन्नविषयकत्वज्ञातीयत्वावच्छेदेन प्रतिबंधकत्वेप्यपि नोचितं द्वयोः सामग्र्योरभावयोरेकत्र प्रवेशापत्तेः गुरु
त्वानुमितिसामग्र्या अपि प्रतिबध्यतावच्छेदकं शाब्दत्वप्रत्यक्षत्वमेवोचितं तत्रापि प्रत्यक्षत्वप्रकारकोपनीतभानसामग्रीविरहप्रवेशस्या
वश्यकत्वादिति दिक् यदपि कश्चिदित्याहुः इच्छाविशिष्टपर्वतो वह्निमान् इति सामग्री प्रतिबध्यतावच्छेदकं समानविषयकानुमि
त्युपनीतभानसाधारणज्ञानत्वं साङ्कर्यात् परोक्षत्वं ज्ञानत्वं न संभवति पर्व/शाब्दो तो वह्निमान् इत्यनुमितौ तादृशोपनीतभा
ने च पृथक् प्रतिबंधकत्वं गौरवात् तस्या ज्ञाते ईश्वरबुद्धिरत्वेपि लौकिकान्यत्वप्रवेशस्य आवश्यकतया तस्यैव कार्यता
वच्छेदकस्य नित्यसाधारणत्वाभावात् न च लौकिकान्यत्वस्य प्रवेशो पर्वतांशे लौकिकस्य वह्न्यनुपनीतभानस्य +तदेव अप्रतिबध्यत्वा

त ब पत्तिः लौकिकवह्निप्रकारतानिरूपितलौकिकपर्वतविशेष्यताकभिन्नत्वस्य प्रतिबध्यतावच्छेदकत्वेच लौकिकप्रत्यक्षसामग्रीकालेपि
शाब्दसामग्र्यभावरूपकारणबलात् लौकिकान्यप्रत्यक्षापत्तिरितिवाच्यं लौकिकवह्निप्रकारतानिरूपितपर्वतविशेष्यताकत्वस्य लौ
२२ किकवह्निप्रकारतानिरूपितलौकिकपर्वतमुख्यविशेष्यताभिन्नवह्निप्रकारतानिरूपितपर्वतविशेष्यताकत्वस्य वा प्रतिबध्यतावच्छे
दकस्य वाच्यत्वात् भगवज्ज्ञाने पुनः अलौकिकप्रकारतानभ्युपगम्यते अभ्युपगम्यते च शाब्दसामग्रीविरहकालीनलौकिक
प्रत्यक्षे इत्यतो नानुपपत्तिरिति अत्र ब्रूमः एवं सति लौकिकवह्निप्रकारतानिरूपितलौकिकपर्वतविशेष्यताभिन्नसंसर्गताभि
न्नविषयत्वस्यैव निवेश्यात्पुनरपि वह्निमत्पर्वतविशेष्यत्वं न प्रवेशनीयं प्रयोजनविरहात् किंतु प्रत्यक्षत्वमेव प्रवेशनीयं अनुमितेस्तु
पृथक् प्रतिबंधकताकल्प्या अन्यथा भिन्नविषयकप्रत्यक्षे पृथक् प्रतिबंधकतापत्तेः नच भिन्नविषयकप्रत्यक्षं प्रति शाब्दविषयकेच्छात्वेन
प्रतिबंधकतातरावश्यकता अन्यथा वह्निमत्पर्वतज्ञानं जायतामितीच्छासहकृतशाब्दसामग्रीसत्वे भिन्नविषयकप्रत्यक्षापत्तेः अतस्त
त्र प्रतिबंधकतावच्छेदकेन शाब्दं जायतामितीच्छाया अपि संग्रहात् नास्माकमपि भिन्नविषयकप्रत्यक्षे पृथक् प्रतिबंधकतेतिवाच्यं
प्रत्यक्षत्वेन शाब्दगोचरेच्छावारणाय तत्र तादृशज्ञानत्वमात्रावच्छिन्नोद्देश्यताकशाब्देच्छात्वस्य अवश्यं प्रवेश्यत्वात् शाब्दत्वनिष्ठजातिनिष्ठ २२
निरवच्छिन्नप्रकारताभिन्नासतीया वह्निविषयत्वादिप्रकारताभिन्नाप्रकारता तन्निरूपकोद्देश्यताकेच्छात्वेन शाब्दं जायतामितीच्छा
संग्रहस्तु तेन रूपेण प्रतिबंधकतायां समानविषयकप्रत्यक्षसामग्रीमात्रस्याभावो निवेशनीयो भवद्भिः अथवा प्रत्यक्षत्वप्रकार
केच्छाविशिष्टतादृशसामग्रीविरहः आद्ये केवलप्रत्यक्षसामग्रीसत्वे तदिच्छाविरहे अनुमितित्वप्रकारकेच्छासत्वेपि भिन्नविष
x शाब्दत्वप्रकारकेच्छासत्वेपि x

यकप्रत्यक्षस्य इच्छयोत्पादापत्तेः द्वितीये ज्ञानत्वप्रकारकेच्छायां सत्यां सति च समानविषयकप्रत्यक्षत्वप्रकारकेच्छाविरहे इच्छ
या भिन्नविषयकप्रत्यक्षानापत्तेः तथा च इच्छाविशिष्टसमानविषयकप्रत्यक्षसामग्रीविरहप्रवेश्य अनुमितित्वशाब्दत्वप्रकारकेच्छया भिन्न
विषयकप्रत्यक्षे तेनापि प्रतिबंधकता आवश्यकी तत्प्रतिबध्यतावच्छेदकं न निरुक्तेन समानविषयकोपनीतभानमपि संगृह्यतामिति किंचा
नुमितिप्रत्यक्षसाधारणज्ञात्वा ज्ञानत्वप्रकारकेच्छायाः प्रतिबंधकतायां तु प्रत्यक्षेच्छाघटितसमानलौकिकप्रत्यक्षसामग्रीविरहप्रवेश्य या
तत्प्रतिबध्यतावच्छेदकं न समानविषयकोपनीतभानसाधारणं प्रत्यक्षत्वप्रकारिकायां ज्ञानत्वप्रकारिकायां चेदिच्छायां चेदिच्छायां सत्यां तदनु
दयापत्तेः किंतु प्रत्यक्षत्वप्रकारकेच्छाघटितसमानविषयकोपनीतभानसामग्रीविरहं समानविषयकप्रत्यक्षप्रकारकेच्छाविरहमात्रमेव वा
प्रविश्य भिन्नविषयकप्रत्यक्षत्वावच्छेदेन प्रतिबंधकता समानविषयकोपनीतभाने तु प्रत्यक्षत्वप्रकारकेच्छाविरहप्रवेश्य या प्रतिबंधकता तद
वच्छेदककुक्षौ च न शाब्देच्छायाः प्रवेशो न वा तत्प्रतिबध्यतावच्छेदके प्रत्यक्षानुमितिसाधारण्यसंभवतीति व्यर्थस्तत्समर्थनावेशः किंच शाब्दे
च्छाविशिष्टशाब्दसामग्र्याः प्रतिबध्यतावच्छेदकं विधेयतोद्देश्यताघटितं अन्यथा वह्निमत्पर्वतो घटवानित्यनुमितेरनुत्पादापत्तेः अतः
कथं प्रत्यक्षसाधारण्यमतस्य घटतिविधेयतायाः प्रत्यक्षेऽस्वीकारात् इति इदं च परोक्षत्वजाते निष्प्रत्यूहतया तदवच्छेदेनैव महानसीयव
ह्न्यभावः लाघवज्ञानसहकृतस्य महानसीयेतराभावाभाववत्पर्वतबुद्धिसहकृतस्य वा अभाववत्याप्यवत्ता परामर्शस्य प्रतिबंधकत्वात्तन्न
सन्देहानुमितेरापत्तिस्तत्र संभवतीयत्परामर्शाभ्यां विशिष्टवैशिष्ट्यानुमितिं अंगीकृत्य संदेहानुमितिस्वीकारेण न च तथापि तस्यानि
र्णीताख्यव्यभिचारस्य शाब्दत्वस्य च प्रतिबध्यतावच्छेदकत्वमनुचितं ननु परोक्षत्वस्य तस्य संदिग्धव्यभिचारकत्वादितिवाच्यं लाघव

त.तत ज्ञानसंभवेनव्यभिचारसंदेहस्य अकिंचित्करत्वात् तथाहि निरुक्तलाघवज्ञानविशिष्टपरामर्शस्य प्रतिबंधकत्वे महानसीयवह्न्यनुमितिं
प्रति लघुमहानसीयवह्न्यभावसमानकालीनाभावव्याप्यवत्पर्वतसमानकालीन शिखरवान् न महानसीयवह्निमान् इति निर्णय
२२ सहकृतं तादृशशिखरवान्पर्वत इति निर्णयस्य प्रतिबंधकतानकल्प्यते तवमते तु तस्यावच्छेदकधर्मदर्शनविधया प्रतिबंधकताध्रौ
व्यात् एतत्क्रोडे च महानसीयवह्न्यभावतादृशलाघवस्य अभावव्याप्यवत्सर्वतस्य च अंतर्भावात्तदुभयनिर्णयावश्यंभावात् कृतप्र
तिबंधकतयैव अनुमित्यनुत्पत्तिसंभवात् न पृथक्प्रतिबंधकतास्माकं कल्पनीयेति एतेन अनुमितिसामग्रीप्रतिबध्यतावच्छेदकज्ञा
तेः प्रत्यक्षशाब्दसाधारण्याः प्रामाणिकत्वेपि न क्षतिः परोक्षत्वावच्छेदेन प्रतिबंधकत्वासंभवविशिष्टत्वानुमितित्वावच्छेदेनैव तथात्वसं
भवात् तथाप्युक्तावच्छेदकधर्मदर्शनप्रतिबंधकत्वाकल्पनेन लाघवात् यद्यपि लाघवज्ञानविशिष्टपरामर्शस्य परोक्षत्वावच्छेदेनप्र
तिबंधकतायां सिध्यभावो ऽवश्यंनिवेशनीयः अनुमितिसामग्रीघटकत्वात् तथा च महानसीयव २२
पृथक्प्रतिबंधकत्वमावश्यकं तथापि सामग्रीघटकत्वेपि महानसीयवह्न्यनुमितिं प्रति परोक्षंप्रतिवा
प्रतिबंध्यतावच्छेदककोटौ च न निरुक्तसिध्यभावनिवेशः तादृशासिद्धिसत्वे तथैव बाधमुद्रया प्रतिबंधात् सामानाधिकरण्येन
सिद्धिसत्वे सामानाधिकरण्येन लाघवज्ञानविशिष्टपरामर्शसत्वे सामानाधिकरण्येन पर्वते महानसीयवह्निशाब्दबोधो
दयात् तदसानन्निवेशनमावश्यकं इत्यपि न अवच्छेदकावच्छेदेन परामर्शघटितसामग्र्याः प्रतिबंधकत्वे सामानाधिकरण्येनासिद्धि
सामग्रीविघटकतया अवच्छेदकावच्छेदेन सिद्धेर्बाधमुद्रया प्रतिबंधकतया तदभावनिवेश्य प्रतिबंधकतायामेव लाघवसंभवात्

सामानाधिकरण्येन परामर्शघटितसामग्र्या अवच्छेदकावच्छेदेन शाब्दबोधे प्रतिबंधकतायामपि न तन्निवेशः तस्याः पक्षतावच्छेदकावच्छेदेन
परोक्षत्वावच्छिन्नं प्रत्येव प्रतिबंधकतया तादृशस्य परोक्षस्य सामानाधिकरण्येन बाधकाले अनुत्पत्तेः न च महानसीयवह्न्यभावलाघव
ज्ञानविशिष्टाभावव्याप्यवत्तापरामर्शप्रतिबंधकतायां महानसीयवह्निमत्पर्वतज्ञानात्मकबाधनिर्णयाभावोऽवश्यंप्रवेशनीयस्तथा च
तादृशबाधज्ञानकालीननिरुक्तावच्छेदकधर्मदर्शनकाले परोक्षापत्तिवारणाय तस्य पृथक्प्रतिबंधकत्वं आवश्यकमिति कुलाघवाव
काश इति वाच्यं तादृशबाधकालीनप्रतिकोटिविशेषदर्शनादिवत्तादृशलाघवज्ञानविशिष्टपरामर्शादपि परोक्षानभ्युपगमात् तस्य बा
धाभावादिकमनिवेश्यैव प्रतिबंधकत्वात् लाघवज्ञानजन्याभावानुमिति प्रतिबंधकस्य कस्याप्यभावानिवेशात् अत एव अभाववान्
पर्वत इति सिद्धेरभावो निरुक्तानुमितिसामग्रीप्रतिबंधकतायां अवश्यंप्रवेशनीयः वह्न्यभावत्वावच्छिन्नविधेयतायाः तादृशसिद्धि
प्रतिबध्यतावच्छेदिकाया निखिललाघवज्ञानजन्यानुमितिसाधारणत्वात् न च लाघवज्ञानजन्यानुमितौ महानसीयवह्न्यभावत्वावच्छि
न्नविधेयतायास्तथात्वेन अभावं अनुमिनोमि इत्यनुव्यवसायासिद्ध्याया आवश्यकत्वे वह्न्यभावत्वावच्छिन्नविधेयतायामानाभावः तत्रम
हानसीयवह्न्यभावत्वावच्छिन्नविधेयत्वांगीकारे महानसीयवह्न्यभाववान् इति सिद्धेस्तत्र प्रतिबंधकतांतरकल्पनापत्तेः न च महानसी
यवह्न्यभावव्याप्यवत्तापरामर्शात् अनुमितौ तादृशसिद्धेः प्रतिबंधकताध्रौव्ये तत एव उपपत्तेर्न पृथक्प्रतिबंधकत्वमिति वाच्यं त
त्कालीय प्रतिबध्यतावच्छेदककोटौ महानसीयवह्न्यभावव्याप्यामुकहेतुपरामर्शाव्यवहितोत्तरत्वस्य तल्लिंगकत्वस्य निवेशाद्व
ह्न्यभावव्याप्यवत्तापरामर्शजन्यानुमितेः संग्रहासंभवात् तत्तल्लिंगकपरामर्शविशिष्टतल्लिंगकानुमितीच्छाया उत्तेजकतापक्षे

त.व पिलाघवज्ञानविशिष्टपरामर्शविशिष्टतादृशपरामर्शजन्यानुमितित्वोरेकाया उत्तेजकताकल्पनाधिक्येन गौरवात् अस्तु वा अनुभवबला
द्विशिष्टधर्मावच्छिन्नविधेयतालाघवज्ञानजन्यानुमितेस्तथापि शुद्धसाध्यतावच्छेदकावच्छिन्नविधेयताव्यापिका स्वीकर्तव्या नच तथासति
०३. सामग्रीव्याप्तौ शुद्धधर्मावच्छिन्नसिद्धेस्तदवच्छिन्नप्रत्यक्षसामग्र्यादीनां चाभावः प्रवेशनीय इति गौरवमितिवाच्यं लाघवज्ञानविशिष्टपरा
मर्शघटितसामग्रीव्याप्तौ शुद्धसाध्यतावच्छेदकावच्छिन्नप्रकारताकप्रत्यक्षसामग्रीविरहस्य मयाप्यप्रवेशनीयत्वात् सत्सामपि लाघ
वज्ञानविशिष्टपरामर्शरूपभिन्नविषयकानुमितिसामग्र्या निरुक्तप्रत्यक्षसामग्र्याः समानविषयकानुमितेरप्रतिबंधात् विशिष्टध
र्मावच्छिन्नप्रत्यक्षसामग्र्या प्रयुक्तोत्तेजिकायां सत्यां तयैव प्रतिबंधसंभवात् तदभावनिवेशेनैव चारितार्थ्यात् सिद्ध्यभावस्य सामग्रीव्या
प्तौ प्रवेशेपि लाघवज्ञानविशिष्टपरामर्शरूपभिन्नविषयकानुमितिसामग्र्याः प्रत्यक्षादिकं प्रति प्रतिबंधकत्वाकल्पनेन लाघवसंभवात्ः
कृत्स्नया शुद्धसिध्यभावविशिष्टशुद्धपरामर्शप्रतिबंधकतयैव निर्वाहात् तवतु विशिष्टसिध्यभावसहकृतविशिष्टपरामर्शरूपायाः सामग्र्यां
सत्सामपि शुद्धसिद्धेः प्रत्यक्षप्रतिबंधाय तथाप्रतिबंधकतावश्यकत्वात् इत्थंच शुद्धसिद्धिकालीननिरुक्तावच्छेदकधर्मदर्शनस्यप्रतिबंध
कत्वांतरमावश्यकमितिपरास्तं विशेषदर्शनस्य चक्रकस्याप्यभावमनिवेश्यैव विशिष्टपरामर्शस्य प्रतिबंधकत्वकल्पनात् परास्तंच वि ०३
शिष्टपरामर्शरूपसामग्र्याः प्रतिबध्यतावच्छेदकं शाब्दत्वमेव युज्यते नत्वनुमितिसाधारणं परोक्षत्वं अनुमितित्वं वा अनुमितिसा
मग्रीप्रतिबंधकतायां तादृशं प्रति परामर्शाभावनिवेशप्रसंगात् अन्यथा तादृशोभयपरामर्शकाले भिन्नविषयकप्रत्यक्षानुदयप्र
संगात् एवंच सामग्रीव्याप्तावपि तन्निवेशाप्रयुक्तं गौरवं लाघवज्ञानविशिष्टपरामर्शत्वेन परामर्शविशिष्टलाघवज्ञानत्वेन वा

प्रतिबंधकतांतरं विनिगमनाविरहश्च इत्यादिकं प्रलपितं सामग्रीप्रतिबंधकत्वसामग्रीव्याप्त्योस्तदनिवेशे निरुक्तावच्छेदकधर्मदर्शनविरह
निवेशेन विपरीतगौरवात् प्रतिबंधकत्वे विनिगमनाविरहस्तु निरुक्तावच्छेदकधर्मदर्शनेपि तुल्य इति प्रतिकोटिविशेषदर्शनस्य लाघवज्ञानादि
घटितानुमितिसामग्र्यां विरहो पि बाधाभावादिरिव न प्रवेश्यते तादृशसत्प्रतिपक्षसंवलनकालेपि शाब्दबुध्यादेरनभ्युपगमादिति नसंशया
नुमितेस्तादृशस्थलेप्यापत्तिरिति केचित् अभावत्वावच्छिन्नसिद्धेः प्रतिबध्यतावच्छेदकाभावत्वावच्छिन्नविधेयतया लाघवज्ञानजन्यानुमितौ नियम
तोंगीकारे मानाभावः नचतदनंगीकारे विशिष्टसिध्यभावं निवेश्य लाघवज्ञानविशिष्टपरामर्शस्य भिन्नविषयकप्रत्यक्षादौ प्रतिबंधकतांतरक
ल्पना गौरवं आशंकनीयं एवमपि लघुमहानसीयवह्न्यभावविषयकज्ञानविषयाभावव्याप्यवत्सर्वतसमानकालीनशिखरत्वावच्छेदे
न महानसीयवह्न्यभावव्याप्यत्वावगाहिपर्वतपक्षकपरामर्शघटितसामग्र्याः प्रतिबंधत्वाकल्पनेन लाघवसंभवात् अतस्तादृशसिध्यभा
वोन निवेशनीय एव लाघवज्ञानविशिष्टाभावव्याप्यपरामर्शप्रतिबंधकतायां विशिष्टसिद्धिस्तु बाधमुद्रयैव प्रतिबंधिकेति न तस्या अपि
पृथगभावः प्रवेशनीयः नच शुद्धसिद्धेः विशिष्टानुमितौ अप्रतिबंधकत्वे लाघवज्ञानविशिष्टपरामर्शस्य भिन्नविषयकप्रत्यक्षादौ प्रतिबंधक
तांतरकल्प्यमान प्रतिकोट्यनुमितिसामग्र्यास्तादृश्याविरहोपि प्रवेशनीय इति गौरवं तन्निवेशेपि अवच्छेदकधर्मदर्शना निवेशेन लाघव
संभवात् नच महानसीयवह्न्यभावाभाववान् पर्वत इति बाधकालीन लाघवज्ञानविशिष्टाभावव्याप्यवत्तापरामर्शसत्वे महानसीयवह्निशा
ब्दबोधोदयात् बाधाभावं निवेश्यैव तादृशसामग्र्याः प्रतिबंधकत्वं मंतव्यं अतस्तादृशावच्छेदकधर्मदर्शनादनुमित्यादरापत्तिवारणाय तस्य
प्रतिबंधकतांतरं आवश्यकं इतिवाच्यं तथापि विशिष्टवैशिष्ट्यावगाहि शाब्दगोचरे काविशिष्ट लघुर्वह्न्यभावसमानकालीनाभाव
व्याप्यवत्सर्वतसमानकालीनपर्वतत्वावच्छेदेन महानसीयवह्न्यभावावगाहि शाब्दसामग्र्यास्तादृशविशेष्यतावच्छेदकप्रकारकज्ञान
महानसीय

घटितायां महानसीयानुमितिं महानसीयवह्निप्रकारिकां प्रति अप्रतिबंधकत्वेन लाघवसंभवात् तत्सामग्रीघटकत्वेन तादृशबाधाभावनिवेशस्य
त.ह आवश्यकत्वात् यद्यपि पर्वतत्वसामानाधिकरण्येन अभाववद्व्याप्यवत्तापरामर्शघटितसामग्र्या अवच्छेदकावच्छेदेन बाधाभावस्यैव घटकतया तस्य च शा
ब्दसामग्र्या अवश्यं प्रतिबंधकत्वेऽपि पर्वतत्वावच्छेदेन परामर्शघटितसामग्र्याः सामानाधिकरण्येन बाधाभावघटकतया तस्य च प्रकृतशाब्दसामग्र्यघट
१८ कतया तस्याः पृथक् प्रतिबंधकत्वेन नावश्यकं न च सामानाधिकरण्येन बाधबुद्धिकालेऽपि पक्षतावच्छेदकावच्छेदेन परामर्शोऽपि सामानाधिकरण्ये
न अनुमितिं जनयत्येवेति चेन्न तद्घटितसामग्रीप्रतिबंधकतायां बाधाभावस्य प्रवेश इति शंक्यं तथा सति बाधकालीनतादृशपरामर्शसत्त्वे सामानाधिकरण्ये
न अनुमित्युत्पत्तावपि तथाविधवह्न्यनुमितेरप्यनुत्पादापत्तेः प्रतिबध्यतावच्छेदके अवच्छेदकावच्छेदेन अनुमितित्वपरीक्षितत्वादेः प्रवेशे तु बाधविशिष्टपरामर्शका
लीनायाः सामानाधिकरण्येन अनुमितौ व्यभिचारवारणाय बाधाभावं निवेश्य तस्य पृथक्प्रतिबंधकत्वापत्तेर्गौरवात् किंच पक्षतावच्छेदकावच्छेदेन परा
मर्शस्य तथाविधानुमितौ कारणतया सामानाधिकरण्येन अनुमितिं प्रत्यपि जनकत्वमानाभावः पक्षतावच्छेदकावच्छिन्नत्वातिरिक्तरूपानवच्छिन्नसंसर्ग
ताकसत्त्वस्य उभयसंग्राहकस्य कार्यतावच्छेदकस्य कल्पने तु गौरवं श्रुत न च सामानाधिकरण्येन बाधबुद्धिकालीनपरामर्शेन अनुमित्यजननं तद्भिन्न
विषयकप्रत्यक्षादेरुत्पादार्थं अनुमितिसामग्रीप्रतिबंधकतावच्छेदककोटौ एतादृशबाधाभावनिवेशे महागौरवापत्त्या तद्गौरवं प्रामाणिकमिति १८
वाच्यं सामानाधिकरण्येन सिद्धिबाधोभयसत्त्वे भिन्नविषयकप्रत्यक्षादेरुपपत्तये तथा प्रतिबंधकताया आवश्यकत्वात् सिध्यभावं
निवेश्यापराप्रतिबंधकतेति विपरीतगौरवात् अनुमित्साविशिष्टानुमितिसामग्रीप्रतिबंधकतायां सामानाधिकरण्येन बाधाभावनिवे
शाद्गौरवं मम तु तादृशसिद्धिसत्त्वेऽपि अनुमित्साया उत्तेजकतया सामानाधिकरण्येन अनुमितेरुत्पादाभ्युपगमान्न तन्निवेशः ॥ ॥